# M.A. 4th Semester Examination, 2024

## SANSKRIT

PAPER – SAN-405(B)

*Full Marks* : 50

*Time* : 2 hours

Answer **all** questions

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

**सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः**

**विभाग–क**

**1.** एकः प्रश्नः समाधेयः — 8×1

(क) वाक्यपदीयानुसारं शब्दब्रह्मणः स्वरूपं तत्प्राप्त्युपायश्च आलोच्येताम् ।

(ख) व्याकरणस्य प्रयोजनविषये भर्तृहरिमतमालोच्यताम् ।

**2.** यथेच्छं कारिकाद्वयं व्याख्येयम् - 4 × 2

(क) तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ।।

(ख) अत्रातीतविपर्यासः केवलामनुपश्यति ।
छन्दस्यश्छन्दसां योनिमात्मा छन्दोमयीं तनुम् ।।

(ग) अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणा ।
अन्वाख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः ।।

**3.** यथेच्छं प्रश्नद्वयं समाधेयम् — 2 × 2

(क) वाक्यपदीयग्रन्थे कति काण्डानि सन्ति ? कानि च तानि ?

(ख) शब्दार्थसम्बन्धविषये भर्तृहरिणा केषां मतमुल्लिखितम् ?

(ग) कस्य मार्गोऽयमाञ्जसः ? कथं तस्याञ्जसत्वम् ?

## विभाग–ख

**4.** एकः प्रश्नः समाधेयः — 8 × 1

(क) कर्तृकारकस्वरूपं परमलघुमञ्जूषादिशा व्याख्यायताम् ।

(*ख*) कर्मकारकेषु अनीप्सितं कर्म, अकथितं कर्म च नागेशानुसार-मालोच्येताम् ।।

**5.** यथेच्छं प्रश्नद्वयं समाधेयम् — 4×2

(*क*) नागेशकृतकर्मलक्षणे ईप्सिततमत्वं नाम किम् ?

(*ख*) आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ।।–व्याख्येयम् ।

(*ग*) स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम् — आलोच्यताम् ।

**6.** यथेच्छं प्रश्नद्वयं समाधेयम् - 2×2

(*क*) क्रियानिमित्तत्वं कारकत्वमिति स्वीकारे का क्षतिः ?

(*ख*) वैयाकरणमते किं नाम सकर्मकत्वम् ? किं वाकर्मकत्वम् ?

(*ग*) परमलघुमञ्जूषायां प्रतिपादितं सम्प्रदानलक्षणं किम् ?

**[ Internal Assessment – 10 Marks ]**